International Journal of Sanskrit Research 2024; 10(3): 35-37

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 35-37
© 2024 IJSR
www.anantaajournal.com
Received: 01-04-2024
Accepted: 02-05-2024

**सुनीता-रुद्र**
शोधच्छात्रा, बाँकुडा विश्वविद्यालयस्य पश्चिमवङ्गस्थ, भारत

**Corresponding Author:**
**सुनीता-रुद्रः**
शोधच्छात्रा, बाँकुडा विश्वविद्यालयस्य पश्चिमवङ्गस्थ, भारत

# वैदेशिकाटनमहाकाव्ये प्रकृतिवर्णनम्

## सुनीता-रुद्र

### प्रस्तावना

आचार्यहरिदत्तशर्मणः वैदेशिकाटनमहाकाव्ये षोडशदेशानां भ्रमणवर्णनं प्राप्यते । आचार्यः देशभ्रमणेन प्राप्तानुभूतिं काव्यरूपेण उपस्थापितवान् I काव्यस्य यत्र तत्र प्रकृतेः सौन्दर्यवर्णनं प्राप्यते । काव्यपरम्परायां प्राचीनकालाद् अधुनापर्यन्तं काव्येषु प्रकृतिसौन्दर्यवर्णनम् उदात्तरूपेण दृश्यते । हरिदत्तशर्मविरचितस्य वैदेशिकाटनमहाकाव्यस्य प्रकृतिवर्णनमपि दर्शनीयम् I

### आकाशमार्गात् भूमिवर्णनम्

आचार्यशर्मा विमानेन विदेशान् गतवान् ,अतः विमानतः अधः प्रकृतेः स्वरूपं कीदृशमस्ति , तस्य वर्णनं बारम्बारं कृतवान् Iआचार्यः विमानतः पृथिव्याः स्वरूपं द्रष्टुं व्याकुलाः आसन् I अतः विमानस्य गवाक्षमार्गेण प्रकृते स्वरूपं दृष्टवान् यथोक्तम्

आकाशमार्गे बहुदृश्यमाला, कुतूहलं वर्धयति स्म चित्ते I
गवाक्षमार्गेण विलोकनेन, नेत्राणि चाकर्षति साऽभिरामा।।[1]

विमानतः गवाक्षमार्गेण पृथिव्याः सौन्दर्यम् अपरूपमिति आचार्येणोक्तम् –

नभः प्रदेशाद् धरणी हि दृश्या , निशि प्रकाशैरभिरामरूपा I
मणिप्रभालङ्कृतचारुदेहा, स्वर्णोज्ज्वलाऽभूषणभूषितमेव ।।[2]

विमानतः पृथिव्यां ग्रामनगरयोः पार्थक्यं न प्रतीयते यतो हि आकाशमार्गात् यत्किमपि दृश्यते तत् सर्वं शिशुक्रीडकानामिव प्रतीयते । आकाशमार्गात् भूमौ विद्यमानजलराशिः कीदृशः प्रतीयते, तस्यापि सौन्दर्यवर्णम् आचार्येण प्रतिपादितं काव्यमाध्यमेन यथोक्तम्-

---

1 .वैदेशिकाटने.४.२

2. वैदेशिकाटने १.१४

नीचैर्जलानां निधिरम्बुराशिः क्वचिद्धिमानी धवला सुशीता ।
घना घनानां सलिलैर्भृताना, महो! विचित्र सितताप्रसारः ।।[3]

आचार्यस्य कवित्वम् अत्रापि दर्शनीयं , यत्र विमानं मेघानां मध्यतः मार्गं कृत्वा चलति । अत्र कविः कल्पयति विमानं मेघान् विदीर्णं कृत्वा गच्छतीति । -

**सागरवर्णनम**

आचार्यः विमानतः ऐट्लाण्टिकसागरस्य अपूर्वसौन्दर्यवर्णनं कृतवान् । आचार्यः आकाशमार्गात् विमानतः भूमेः जलराशेःमेघानां च सौन्दर्यं दृष्टवान् । अस्मिन् जगति हिमवृक्षापर्वतमेधजलराशि-वन-चन्द्रविम्ब-तारकाभूतलमादयः रराजन्ते । अतः अन्ते कविदृष्ट्या आचार्येणोक्तं जगदिदं रम्यमिति-

हिमा द्रूमाः पर्वतमेघखण्डा, जलं वनं तारका-चन्द्रविम्बम् ।
निशा दिशो भूतलमम्वरञ्च, सर्वं जगद् रम्यविधानमग्रे ।।[4]

अमेरिकादेशस्य सागरवर्णनं सर्वेषां मनोज्ञम् । यत्र आकाशमार्गे नववायुयानं स्वाच्छन्देन भ्रमणं करोति । सागरमध्ये अनेके नौकाः विचरन्ति , तासु नौकासु यात्रिणः विद्यमानाः सन्ति । सागरस्य तटेषु अनेके प्रस्तरखण्डाः सन्ति ।[5]

**जलयात्रावर्णनम्**

हरिदत्तशर्मणः जलयात्रावर्णनं दर्शनीयम् । पूर्वजर्मनीयात्रा काले शर्मा जलयात्रां कृतवान् । जलीययाने शताधिकाः जनाः विद्यमानाः आसन् । सर्वे सानन्देन जलवविहारं कृत्वा प्रफुल्लमनस्काः आसन् । ये दृश्यानि सर्वेषां मनो हरन्ति तानि यथा- नौका-मत्स्याःखगाः-घनवनं सुन्दरगृहाणि पादपादयः ।

जलानि नौका बहुयन्त्रचालिता , मत्स्याः खगाः पुष्पलता घनं वनम् ।
गृहाणि ग्रीष्मर्तुसुखानि पादपा -,स्तटानि दृश्यानि मनो हरन्ति नः ।।[6]

पाश्चात्यजनेषु कामप्रवृत्तेः वर्णनं शर्मा कृतवान् । पश्चिमि देशे पानाशने अर्थात् समुद्रतटेषु, यानेषु च भोजनं पानमादि सहजतया कुर्वन्ति तथा सूर्यतापैः स्वशरीरं तस्वा आनन्दं प्राप्नुवन्ति युग्मकाः ।

**गृहवर्णनम्**

जर्मनदेशस्य गृहमपि प्राकृतिकतत्वैः सज्जितमस्ति । आचार्यः रोथनामकस्य मित्रस्य गृहं गत्वा रोथस्य गृहं दृष्टवान् । तत्र गृहं द्रूमैः पुष्पैः च सज्जितमस्ति। आचार्यः जर्मनदेशस्य मित्रगृहं गतवान् , यत् गृहं ग्रामे आसीत् । तस्मिन् गृहे विद्युतमस्ति , तथापि मोमप्रदीपाः ज्वलन्ति । तत् रतापहेतोः काष्ठप्रयोगः भवति । तत् गृहं काष्ठनिर्मितमस्ति , तृणाच्छादितं तथा पुष्पैः सज्जितमस्ति इति आचार्येण दृष्टम् ।

सुकाष्ठैर्गृहं निर्मितं सुन्दरं तत् , समन्तात् तृणाच्छादनं पुष्पमाला ।
समीपं सुसस्यैर्भृतं क्षेत्रमास्ते , ततं सर्वतः प्राकृतं रम्यरूपम् ।। [7]

थाईदेशस्य सौन्दर्यम् अतीव मनोहरम् । अत्र जलप्रपाताः सन्ति, यत्र निरन्तरं जलप्रवाहः दृश्यते । प्रायः यात्रिणः थाईसौन्दर्यदर्शनाय अत्र समागच्छन्ति ।
आचार्यमते लन्दनदेशस्तु नन्दनकाननवद् प्रतीयते । अस्य नगराणि तु द्रुमैर्लताभिः कुसुमैः सुसज्जितानि सन्ति ।[8] लन्दनस्य आकर्षणं वर्धयति टेम्सनदी या विशाला अस्ति । अत्रैव विशालं भ्रमिचक्रमस्ति , यत् लन्दनस्य चक्षु इत्युच्यते । यथोक्तम् -

सा टेम्सनाम्नी सुनदी विशाला , या यात्रिणां वारिविहारदात्री ।

[3]. वैदेशिकाटने. ४.४

[4] . वैदेशिकाटने..४.३५

[5] .वैदेशिकाटने.१७.३८

[6] . वैदेशिकाटने. २.१६

[7] . वैदेशिकाटने.३.२६

[8] . वैदेशिकाटने..१६.१५

नौका तु नौका भरिता जनौघैः, प्लवन्ति मध्येसलिलं सुरम्याः ।।[9]

पूर्वामेरिकाभ्रमणवर्णनक्रमे शीतकालस्य वर्णनमस्ति । शीतकाले वृक्षेषु न पत्राणि न पुष्पाणि न च फलानि सन्ति , सर्वत्र श्वेतवस्त्रमिव हिमाच्छादितमस्ति । परन्तु वसन्तकाले वृक्षादयः पुष्पैः पत्रैः फलैः च सुसज्जिताः सन्ति ।

अल्पायुरेवात्र वसन्तकाल -,श्चकास्ति यस्मिन् प्रकृतिः सुसज्जा ।
विभिन्नवर्णैः कुसुमैः सगुच्छै, र्विभूषिता भूः रमणीव रम्या ।।[10]

उपर्युक्तवर्णनेन स्पष्टमस्ति प्राचीनकाव्यपरम्परायां प्रकृतिचित्रणं यथा लतावनस्पतिसमुद्र- आकाश-मेघ-पर्वतादीनां वर्णनेन निष्पन्नं भवति , तद्वत् आधुनिकवैदेशिककाव्यपरम्परायाम् आचार्यहरिदत्तशर्माविरचिते वैदेशिकटनमहाकाव्ये अपि प्राकृतिकतत्त्वानां सौन्दर्यवर्णनं दृश्यते । हरिदत्तशर्मा सायंकालस्य मनहरणकारीवर्णनं तथा सूर्यास्तवर्णनं करोति, सूर्यास्तः सर्वेषां चित्तं उद्वेलयति । प्राचीनपरम्परायाम् आकाशमार्गतः पृथिव्यासौन्दर्यवर्णनं यथा कालिदासस्य रघुवंशे तथा मेघदूतगीतकाव्ये प्राप्यते । रघुवंशे रामचन्द्रेण पुष्पकविमानतः सागरस्य सौन्दर्यवर्णनं क्रियते । तादृशसागरवर्णनं वैदेशिकाटनमहाकाव्ये अपि प्राप्यते ।

**सन्दर्भ ग्रन्थाः**

1. शर्मा,हरिदत्त. वैदेशिकाटनम्. जनकपुरी-दिल्लीः राष्ट्रियसंस्कृत संस्थान, 2017 ।
2. वैदेशिकाटने.४.२
3. वैदेशिकाटने १.१४
4. वैदेशिकाटने. ४.४
5. वैदेशिकाटने..४.३५
6. वैदेशिकाटने.१७.३८
7. वैदेशिकाटने. २.१६
8. वैदेशिकाटने.३.२६
9. वैदेशिकाटने..१६.१५
10. वैदेशिकाटने १६.१६
11. वैदेशिकाटने १९.१०

[9] . वैदेशिकाटने १६.१६

[10] . वैदेशिकाटने १९.१०